# Krishnaramavataracharitaratnasangrahah

# કૃષ્ણરામાવતારચરિતરત્નસઙ્ગ્રહઃ

## Document Information

Text title : Krishnaramavataracharitaratnasangrahah

File name : kRRiShNarAmAvatAracharitaratnasangrahaH.itx

Category : vishhnu, vAdirAja, vishnu, krishna, raama

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Mrs Sornavalli, Revathy R.

Latest update : June 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 19, 2024

*sanskritdocuments.org*

# કૃષ્ણરામાવતારચરિતરત્નસઙ્ગ્રહઃ

ક્ષીરામ્બુધૌ ફણિપતેર્મૃદુભોગશય્યા-
શાયી રમાકરસરોરુહલાલિઙ્ઘ્રિઃ ।
આનન્દમૂર્તિરખિલામરમૌલિરસ્માન્
નાનાવતારજિતદૈત્યજનઃ સ પાયાત્ ॥ ૧॥

બ્રહ્મેશશક્રમુખદેવવરાર્થિતો યઃ
શ્રીદેવકીતનયતામધિગમ્ય ગોષ્ઠે ।
પ્રાક્પૂતનાશકટવાતવિનાશકારી
ભૂત્વા બભઞ્જ શિશુરર્જુનપાદપૌ દ્વૌ ॥ ૨॥

તત્રોત્થિતૌ સ્વશરણાવનુગૃહ્ય ગોપી-
ગેહેષુ દુગ્ધનવનીતદધીનિ ભુક્ત્વા ।
વૃન્દાવનં પ્રતિગતોઽથ નિહત્ય વત્સ-
દૈત્યં બકં ચ નિજકાળિયશિક્ષકોઽભૂત્ ॥ ૩॥

દત્વાઽભયં ચ પુનરત્ર નિશિ પ્રવૃદ્ધં
પીત્વા દવાગ્નિમથ ગોકુલમુગ્રવૃષ્ટેઃ ।
ગોવર્ધનોચ્ચગિરિમેકકરેણ બિભ્ર-
દ્બાલોઽભિરક્ષ્ય વિમદેન્દ્રકૃતાર્હણોઽભૂત્ ॥ ૪॥

રાસોત્સવે વ્રજવધૂભિરથો વિહૃત્ય
સ્વાનન્દમૂર્તિરવધીન્નિશિ ચન્દ્રચૂડમ્ ।
પશ્ચાદરિષ્ટમથ કેશિવધં વિધાય
સાકં બલેન મધુરાં નગરીં જગામ ॥ ૫॥

કુબ્જાસુદામવરદો રજકં નિહત્ય છિત્વા
ધનુઃ સ નિહતેભવરોઽથ મલ્લાન્ ।
કંસં ચ સંસદિ વિમૃદ્ય મુદં સ્વપિત્રી-
દત્વા જરાસુતબલં બહુશો જઘાન ॥ ૬॥

દ્વારાવતીં પુરમથો વિરચય્ય તસ્યાં
બન્ધૂન્નિધાય યવનં મુચુકુન્દદૃષ્ટ્યા ॥

દગ્ધ્વાઽથ ભીષ્મકસુતાદિનિજાષ્ટપત્ની-
હસ્તં પ્રગૃહ્ય મુરજિન્નરકં મમર્દ ॥ ૭॥

કન્યાસહસ્રવરતાં પ્રતિપદ્ય દેવાન્
નિર્જિત્ય કલ્પતરુમાત્મપુરં નિનાય ।
પ્રદ્યુમ્નમુખ્યતનયાન્સુબહૂન્સ સૃષ્ટ્વા
કૃષ્ણોઽથ પૌણ્ડકમુખાસુરમર્દનોઽભૂત્ ॥ ૮॥

સંસાધ્ય ધર્મતનયસ્ય સ રાજસૂયં
હત્વાઽથ તત્ર શિશુપાલમથાગ્રપૂજામ્ ।
જગ્રાહ તીર્ણવનવાસમહામ્બુરાશેઃ
પાર્થસ્ય સારથિરભૂત્કુરુભૂમિયુદ્ધે ॥ ૯॥

દુર્યોધનં સહ બલેન વિનાશ્ય પાર્થાન્
કૃત્વા ક્રમેણ ચતુરન્તધરાધિનાથાન્ ।
નિષ્કણ્ટકૈર્નિજજનૈઃ સહિતઃ સપુત્ર-
પૌત્રઃ શશાસ જગતીં જગદેકનાથઃ ॥ ૧૦॥

હત્વા પૂતનિકાં વિભજ્ય શકટ વાતં નિહત્યાર્જનૌ
છિત્વા વત્સબકી વિનાશ્ય ફણિજિત્પીતાનલઃ પર્વતમ્ ।
ધૃત્વા ગોપવધૂઃ પ્રતોષ્ય જનકાર્તિઘ્નો વૃષં કેશિનં
જિત્વાજ્વી પ્રણતાં વિધાય ધનુરુચ્છિદોભમલ્લાનહન ॥ ૧૧॥

કંસારિર્જિતમાગધો યવનજિત્સ્વીયાષ્ટપત્નીપતિઃ
હત્વોગ્રં નરકં વધૂતતિવૃતો જિત્વાઽમરાન્સ્વસ્તરુમ્ ।
લબ્ધ્વા પીણ્ડકકાશિરાજશિશુપાલનઃ કુરૂણાં બલં
દગ્ધ્વા સારથિરર્જુનસ્ય જગતીં કૃષ્ણઃ શશાસ પ્રભુઃ ॥ ૧૨॥

કૃષ્ણઃ પૂતનિકારિરસ્તશકટો વાતાન્તકઃ પાદપ-
ચ્છેત્તા વત્સબકાહિજિદ્ધૃતગિરિગોપીષ્ટદોઽરિષ્ટહૃત્ ।
કેશિનો હતમલ્લકંસયવનક્ષ્માજાદિરામાબલા-
સાહસ્તોઽર્જુનસારથિઃ કુરુબલં હત્વા રરક્ષ ક્ષિતિમ્ ॥ ૧૩॥

કૌસલ્યાસુત તાટકામથ મખત્રાતર્મુનિસ્વીહિત
છિન્નેષ્વાસન જાનકીવૃત વનાવાસિન્ ખરાધ્વન્તક ।
મારીચન હનુમદીશ રવિજાર્તિચ્છેદ બદ્ધામ્બુધે
સેનાભ્રાતૃસમેત રાવણરિપો સીતેષ્ટ રામાવ મામ્ ॥ ૧૪॥

સઙ્ગૃહ્ય પદ્યમયસૂત્રવરેણ કૃષ્ણ-
રામાવતારચરિતાભિધરત્નરાશિમ્ ।
તદ્ભક્તભૂસુરકૃતેऽકૃત વાદિરાજ-
ભિક્ષુઃ પઠત્કવિકદમ્બકકણ્ઠભૂષામ્ ॥ ૧૫॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતં
કૃષ્ણરામાવતારચરિતરત્નસઙ્ગ્રહઃ સમાપ્તઃ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Mrs Sornavalli

---

*Krishnaramavataracharitaratnasangrahah*
pdf was typeset on June 19, 2024

Please send corrections to *sanskrit@cheerful.com*